# श्रीमद्भगवद्गीता (Epi – 1)

महर्षिवेदव्यासप्रणीतस्य महाभारतस्य भीष्मपर्वस्य अन्तर्गता इयं श्रीमद्भगवद्गीता। अष्टादशाध्यायाः वर्तन्ते अस्मिन् ग्रन्थे। समग्रे ग्रन्थे अस्मिन् ७०० संख्यकानि श्लोकानि विद्यन्ते, तस्मात् अस्याः अपरनाम 'सप्तशती' इति। अध्यायानां नामानि क्रमेण प्रदीयते। प्रथमोऽध्यायस्य नाम तावत् 'अर्जुनविषादयोगः' इति। द्वितीयोऽधायायः 'सांख्ययोगः' इति। तृतीयोऽध्यायस्य नाम 'कर्मयोगः' इति। चतुर्थः 'ज्ञानयोगः' इति। पञ्चमः 'सन्न्यासयोगः' इति। षष्ठः 'ध्यानयोगः' इति। सप्तमः ' ज्ञानविज्ञानयोगः' इति। अष्टमः 'अक्षरब्रह्मयोगः' इति। नवमोऽध्यायस्य नाम ' राजयोगः' इति। दशमोऽध्यायस्य नाम 'विभूतियोगः' इति। एकादशाध्यायस्तावत् 'विश्वरूपदर्शनयोगः' इति। द्वादशोऽध्यायस्य नाम 'भक्तियोगः' इति। त्रयोदशाध्यायस्य नाम 'क्षेत्रक्षेत्रज्ञविभागयोगः' इति। चतुर्दशः ' गुणत्रयविभागयोगः' इति। पञ्चदशः 'पुरुषोत्तमयोगः' इति। षोडषाध्यायस्य नाम ' दैवासुरसम्पदविभागयोगः' इति। सप्तदशः 'श्रद्धात्रयविभागयोगः' इति। एवञ्च अष्टादशाध्यायस्य नाम 'मोक्षयोगः' इति।

भारतीयधर्मसाधनायाः अध्यात्मभावनायाश्च इतिहासे अन्यतमा एषा गीता प्रतिष्ठिता। अस्याः आलोच्यविषयः ब्रह्मविद्या योगशास्त्रं च। कुरुपाण्डवाणाम् आसन्नमाहायुद्धस्य अव्यवहिते पूर्वे उभयपक्षयोः सेनासमुदायोः मध्ये अर्जुनस्य रथस्य आगमनं भवति। तत्र सारथिः श्रीकृष्णः। अर्जुनः पश्यति अग्रभागे

कौरवसेनासमुदाये उपस्थिताः तस्य एव ज्ञातिजनाः। पितामहः भीष्मः, आचार्यः द्रोणः, ज्ञातिभ्राता दुर्योधनः अपि च अनेके परिचिताः जनाः। एतान् सर्वान् दृष्ट्वा अर्जुनः विषादग्रस्थः भवति। हस्ताभ्यां गाण्डीवास्त्रं भूमौ पतति। तस्य शरीरं कम्पमानं रोमाञ्चितं च भवतः। स रथे उपविशति। परन्तु क्षत्रियवीरस्य अर्जुनस्य एतदाचरणं अशोभनीयम्। अथ श्रीकृष्णः तदा स्वकीयस्य क्षात्रधर्मस्य स्मरणाय आत्मतत्त्वमूलकानि उपदेशानि अर्जुनाय निवेद्यते। अतः समग्रायां गीतोपनिषदि अर्जुनस्य जिज्ञासा तथा भगवतः श्रीकृष्णस्य उपदेशाः दरीदृश्यते। अस्य ग्रन्थस्य बहवः व्याख्याः टीका च उपलब्धन्ते। प्रसिद्धटीकाकाराणां मध्ये आचार्यः शङ्करः, श्रीधरस्वामी, रामानुजः, नीलकण्ठश्चेति प्रमुखाः।

आत्मतत्त्वमूलकानां बहूनां उपदेशानां मध्ये मनःनियन्त्रणात्मकानि कानिचन उपदेशानि गीतासु वयं पश्यामः। मनः एकम् इन्द्रियम्। येन सुखादीनाम् उपभोगः भवति। वास्तविकजीवने कस्यापि कार्यस्य परिपूर्णताप्रदाने मनसः संयोगः मनसः एकाग्रता वा अत्यन्तं प्रयोजनम्। मनःसंयोगस्य अभावे कार्यस्थले भ्रान्तिः समुत्पद्यते। अथ कथं एषः मनःसंयोगः भवेदिति प्रश्ने उच्यते मनसः चित्तस्य नियन्त्रणमाध्यमेन स भविष्यति। अस्माकं मतिः सदा चञ्चला, दूराद् अतिदूरे सा सदा परिभ्रमति। किम् अस्माकं करणीयं किञ्च अकरणीयम्, किम् उचितं किञ्च अनुचितं एतत् सर्वं प्रायः वयं विस्मरामः। अतः –

> तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।
> ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।१६।२४।।(गीता)[1]

इति गीताशास्त्रोक्ति-अनुसारं मनसः नियन्त्रणस्य मार्गः वयं शास्त्रादेव जानीमः।

---

[1] বঙ্গানুবাদ - কর্তব্য ও অকর্তব্য নির্ধারণে যে কি করা উচিৎ, কি করা উচিৎ নয়, শাস্ত্রই এ বিষয়ে জ্ঞাপক। এতএব শাস্ত্রবিধির স্বরূপ জেনে নিয়ত কর্ম করা উচিৎ।

तत्र क्षेत्रविशेषे अस्माकं मनसि कश्चित् विषयं केन्द्रीकृत्य मानसिकसंघातः द्वन्द्वः वा उत्पद्यते। तस्मात् द्वन्द्वात् निष्पत्ति-उपायाः (Means of conflict resolution) गीतासु आलोचिताः।

मानसिकसंघातस्य समाधाने आदौ 'ज्ञानस्य गुरुत्वम्' (Importance of knowledge) इति विषये वयं जानीमः। ज्ञानस्य गुरुत्वविषये गीतायाः द्वितीयोऽध्यायस्य द्विपञ्चाशत्-तमे श्लोके भगवान् श्रीकृष्णः वदति –

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च।।२।५२।। (गीता)

अन्वयः – यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति। तदा श्रोतव्यस्य श्रुतस्य च निर्वेदं गन्तासि।

অনুবাদ – যখন তোমার (অর্জুনের) বুদ্ধি মোহকলুষতা কে অতিক্রম করবে তখন যাবতীয় যা শোনার যোগ্য এবং যাবতীয় যা শোনা হয়ে গেছে, সেই সমস্ত কিছুর ফলবিষয়ে নির্বেদ অর্থাৎ বৈরাগ্যতা লাভ করবে।

व्याख्या – अस्माकं या निश्चयात्मिका अन्तःकरणवृत्तिः सा एव बुद्धिः उच्यते। ज्ञानस्य गुरुत्वविषये बुद्धेः भूमिका अत्यन्तगुरुत्वपूर्णा वर्तते। मनुष्यबुद्धिः धन-पुत्र-सामाजिकप्रतिष्ठादिना प्रायः आबद्धा अस्ति। एतेन मनः सदा विषयचिन्तनेन मोहग्रस्तं जातम्। मोहपरिपूर्णे मनसि कलुषता पापां वा समुत्पद्यते। एवं मोहयुक्तबुद्ध्या वयं यत् किञ्चिदेव परवर्तिनिकाले श्रोष्यामः तस्य फलं तदा विषययुक्तमेव भवेत्। तत्र वैराग्यतायाः अवसरः नास्ति। योगशास्त्रानुसारं -

‘दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम्।’[2]इति।

अतः वैरग्यस्य अभावे पुनः वयं मोहाच्छन्नाः तिष्ठामः। अपि च मोहयुक्तबुद्ध्या वयं यत् किञ्चिदेव अधुना शृणुमः तस्यापि फलं वैराग्यहीनम्। अतः भगवतः श्रीकृष्णस्य मते यदा अस्माकं बुद्धिः सर्वप्रकारकायाः मोहकालिमायाः दूरीकरणे समर्था भविष्यति तदा सकलश्रोतव्यात् श्रुतात् च फलस्वरूपेण वैराग्यम् अनासक्तिः वा वयं लभिष्यामः।

*****

■ To be continued …

[2] দৃষ্ট অথবা শ্রুত সর্বপ্রকার বিষয়ের আকাঙ্খা যিনি ত্যাগ করেছেন, তাঁর নিকট যে একটা অপূর্ব ভাব আসে, যাতে তিনি সমস্ত বিষয় বাসনা কে দমন করতে পারেন, তাকে বৈরাগ্য বা অনাসক্তি বলে। (যো.সূ. সমাধি. পা. ১৫)